# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा – आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ४ | |
| विषयः – स्वामिनारायणवेदान्तः ( J ) | (C.C.- 5.3.9 New ) | गुणाः – ७० |
| दिनाङ्कः – १२/१०/२०१९ | सन्दर्भग्रन्थः– श्रीमद्भगवद्गीता | समयः –३.०० तः ६.०० |

**प्रथमान्वितिः**

**प्रश्नः १ कस्यचिदेकस्य यथाभाष्यं व्याख्या कार्या।** (५)

(१) अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥

(२) य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥

**प्रश्नः २ कस्यचिदेकस्य प्रश्नस्योत्तरं लेख्यम्।** (१०)

(१) क्षेत्र–क्षेत्रज्ञयोः लक्षणानि निरूपयत।

(२) त्रयोदशोऽध्यायस्य सारतत्त्वं लिखत।

**द्वितीयान्वितिः**

**प्रश्नः ३ कस्यचिदेकस्य यथाभाष्यं व्याख्या कार्या।** (५)

(१) सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥

(२) ममैवांशो जीवलोके जीवभूतः सनातनः।
मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥

**प्रश्नः ४ कस्यचिदेकस्य प्रश्नस्योत्तरं देयम्।** (१०)

(१) प्रकृतिपुरुषयोः संयोगेन सर्वोत्पत्तिं वर्णयत।

(२) ग्रन्थोक्तदिशा पुरुषोत्तमस्वरूपम् उपवर्णयत।

**तृतीयान्वितिः**

**प्रश्नः ५ कस्यचिदेकस्य यथाभाष्यं व्याख्या कार्या।** (५)

(१) दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव॥

(२) विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।

**प्रश्नः ६ कस्यचिदेकस्य प्रश्नस्योत्तरं लेख्यम् ।** (१०)

(१) दैवासुरसम्पद्विभागयोगे किं किं वर्णितं ? यथाग्रन्थं प्रतिपादयत ।

(२) त्रिविधाहाराणां वर्णनं कुरुत ।

## चतुर्थान्वितिः

**प्रश्नः ७ कस्यचिदेकस्य यथाभाष्यं व्याख्या कार्या ।** (५)

(१) यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥

(२) प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भायाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥

**प्रश्नः ८ कस्यचिदेकस्य प्रश्नस्योत्तरं लेख्यम् ।** (१०)

(१) अष्टादशोध्यायानुसारं त्यागसिद्धान्तान् निरूपयत ।

(२) यथाभाष्यं फलसहितं वर्णधर्मविषयं वर्णयत ।

**प्रश्नः ९ अधोनिर्दिष्टेषु दशप्रश्नानामुत्तराणि लिखत ।** (१०)

(१) किं क्षेत्रम् इत्यभिधीयते ?

(२) सुखदुःखानां भोक्तृत्वे कः हेतुरुच्यते ?

(३) कतिगुणाः ? के च ते ?

(४) कः गुणः सुखे सञ्जयति ?

(५) राजसाः कुत्र तिष्ठन्ति ?

(६) अश्वत्थवृक्षस्य मूलं कुत्र वर्तते ?

(७) कः रसात्मकः सोमो भूत्वा औषधीं पुष्णाति ?

(८) कतिविधमन्नम् ?

(९) का सम्पद् विमोक्षाय ?

(१०) कतिविधं नरकस्य द्वारम् ?

(११) सात्विकाः कान् यजन्ते ?

(१२) सप्तदशाऽध्याये कति श्लोकाः सन्ति ?

(१३) कः सात्विकः त्यागः ?

(१४) कतिधा बुद्धिः ?

(१५) ईश्वरः कुत्र तिष्ठति ?

--००--